# Gopala Guru Gosvami PrabhorAShTakam

# ગોપાલગુરુગોસ્વામીપ્રભોરાષ્ટકમ્

## Document Information

Text title : Gopala Guru Gosvami Prabhorashtakam

File name : gopAlagurugosvAmIprabhorAShTakam.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Dina Bandhu Das

Latest update : September 19, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 19, 2020

*sanskritdocuments.org*

# ગોપાલગુરુગોસ્વામીપ્રભોરાષ્ટકમ્

શ્રીમન્મુરારિતનયં વિનયાદમન્દં
    વન્દે સદૈવ મકરધ્વજપણ્ડિતાખ્યમ્ ।
શ્રીગૌરચન્દ્રકૃપયાર્પિતગૌરવં શ્રી-
    ગોપાલપૂર્વગુરુરિત્યભિધાં દધે યઃ ॥ ૧॥

વન્દે તમેવ તિલકં કિલ કલ્પયિત્વા
    ગૌરપ્રભુર્હરિપદાકૃતિ યસ્ય ભાલે ।
સ્વીયાસને સમુપવેશ્ય જગત્ત્રયસ્ય
    વિસ્માપિકામપિ વિકાશયતિ સ્મ શક્તિમ્ ॥ ૨॥

શિક્ષાગુરું સ્વકૃપયા સ શચીતનૂજો
    યં કારણં કિમપિ વીક્ષ્ય ચકાર ધીરમ્ ।
સિદ્ધાખ્યાયાપ્યભિદધે સ્વયમેવ મઞ્જુ-
    મેધેતિ તં ગુરુવરં શરણં ભજામિ ॥ ૩॥

શ્રીરાધયા વ્રજવિધોરપિ યશ્ચ તુઙ્ગ-
    વિદ્યાનુગોઽપ્યનુદિનં ભજનેષ્વનન્યઃ ।
નિત્યં સખીગણયુતો રમતે વ્રજે શ્રી-
    ગોપાલમેવ કલયે શરણં ગુરું તમ્ ॥ ૪॥

ગોસ્વામિનઃ ષડુદિતા અધિકાશ્ચતુર્ભિઃ
    ષષ્ઠિર્મહાન્ત ઇહ ગૌરહરેર્નિદેશાત્ ।
ગોપાલકા અતિશયાત્ કિલ યઃ શશંસુઃ
    નિઃશંશયા ગુરુતયા તમહં પ્રણૌમિ ॥ ૫॥

યત્પ્રેમધન્યહૃદયઃ સ દયાસમુદ્રઃ
    પ્રોલ્લાસ્ય સાન્દ્રગુણતાં પ્રભુગૌરચન્દ્રઃ ।
જીવાન્ અતીવવિનયેન સમુદ્દધાર
    વન્દે ગુરૂત્તમમહં તમિમં મહાન્તમ્ ॥ ૬॥

યસ્તાદૃશોઽપિ ભગવદ્ગુણકર્મનામ્નાં
    સઙ્કીર્તનશ્રવણસંસ્મરણાદિભક્ત્યા ।
આપામરં જગદિદં સ્વયમુદ્ધાર
    ગોપાલપૂર્વગુરુમેતમહં નતોઽસ્મિ ॥ ૭॥

ચૈતન્યચન્દ્રકૃપયા ચિરમેવ રાધા-
    કાન્તાઙ્ઘ્રિપદ્મયુગયોઃ પરિચર્યયોચ્ચૈઃ ।
તદ્ભાવભાવિતમતિર્ન તનૂ બુબોધ
    ગોપાલપૂર્વગુરુમેનમહં નતોઽસ્મિ ॥ ૮॥

ઇતિ શ્રીદીનબન્ધુદાસવિરચિતં ગોપાલગુરુગોસ્વામીપ્રભોરાષ્ટકં સમ્પૂર્ણમ્ ।

---

*Gopala Guru Gosvami PrabhorAShTakam*

pdf was typeset on September 19, 2020

Please send corrections to *sanskrit@cheerful.com*